श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

## श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये बालकाण्डे

# ॥ सप्ततितमः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# ॥ सप्ततितमः सर्गः ॥

जनकेन साङ्काश्यातो स्वानुजस्य कुशध्वजस्य दूतैः समानयनं दशरथस्यानुरोधेन वसिष्ठकर्तृकं सूर्यवंशपरम्परावर्णनं रामलक्ष्मणयोः कृते सीतोर्मिलयोर्वरणं च

ततः प्रभाते जनकः कृतकर्मा महर्षिभिः।
उवाच वाक्यं वाक्यज्ञः शतानन्दं पुरोहितम् ॥ **1.70.1** ॥

भ्राता मम महातेजा वीर्यवानतिधार्मिकः।
कुशध्वज इति ख्यातः पुरीमध्यवसच्छुभाम् ॥ **1.70.2** ॥

वार्याफलकपर्यन्तां पिबन्निक्षुमतीं नदीम्।
साङ्काश्यां पुण्यसङ्काशां विमानमिव पुष्पकम् ॥ **1.70.3** ॥

तमहं द्रष्टुमिच्छामि यज्ञगोप्ता स मे मतः।
प्रीतिं सोऽपि महातेजा इमां भोक्ता मया सह ॥ **1.70.4** ॥

एवमुक्ते तु वचने शतानन्दस्य सन्निधौ।
आगताः केचिदव्यग्राजनकस्तान् समादिशत् ॥ **1.70.5** ॥

शासनात् तु नरेन्द्रस्य प्रययुः शीघ्रवाजिभिः।
समानेतुं नरव्याघ्रं विष्णुमिन्द्राज्ञया यथा ॥ **1.70.6** ॥

साङ्काश्यां ते समागम्य ददृशुश्च कुशध्वजम्।
न्यवेदयन् यथावृत्तं जनकस्य च चिन्तितम् ॥ **1.70.7** ॥

तद्वृत्तं नृपतिः श्रुत्वा दूतश्रेष्ठैर्महाजवैः।
आज्ञया तु नरेन्द्रस्य आजगाम कुशध्वजः॥ **1.70.8** ॥

स ददर्श महात्मानं जनकं धर्मवत्सलम्।
सोऽभिवाद्य शतानन्दं जनकं चातिधार्मिकम्॥ **1.70.9** ॥

राजार्हं परमं दिव्यमासनं सोऽध्यरोहत।
उपविष्टावुभौ तौ तु भ्रातरावमितद्युती॥ **1.70.10** ॥

प्रेषयामासतुर्वीरौ मन्त्रि श्रेष्ठं सुदामनम्।
गच्छ मन्त्रिपते शीघ्रमिक्ष्वाकुममितप्रभम्॥ **1.70.11** ॥

आत्मजैः सह दुर्धर्षमानयस्व समन्त्रिणम्।
औपकार्यां स गत्वा तु रघूणां कुलवर्धनम्॥ **1.70.12** ॥

ददर्श शिरसा चैनमभिवाद्येदमब्रवीत्।
अयोध्याधिपते वीर वैदेहो मिथिलाधिपः॥ **1.70.13** ॥

स त्वां द्रष्टुं व्यवसितः सोपाध्यायपुरोहितम्।
मन्त्रि श्रेष्ठवचः श्रुत्वा राजा सर्षिगणस्तथा॥ **1.70.14** ॥

सबन्धुरगमत् तत्र जनको यत्र वर्तते।
राजा च मन्त्रिसहितः सोपाध्यायः सबान्धवः॥ **1.70.15** ॥

वाक्यं वाक्यविदां श्रेष्ठो वैदेहमिदमब्रवीत्।
विदितं ते महाराज इक्ष्वाकुकुलदैवतम्॥ **1.70.16** ॥

वक्ता सर्वेषु कृत्येषु वसिष्ठो भगवानृषिः।
विश्वामित्राभ्यनुज्ञातः सह सर्वैर्महर्षिभिः॥ **1.70.17** ॥

एष वक्ष्यति धर्मात्मा वसिष्ठो मे यथाक्रमम्।
तूष्णींभूते दशरथे वसिष्ठो भगवानृषिः॥ **1.70.18** ॥

उवाच वाक्यं वाक्यज्ञो वैदेहं सपुरोधसम्।
अव्यक्तप्रभवो ब्रह्मा शाश्वतो नित्य अव्ययः॥ **1.70.19** ॥

तस्मान्मरीचिः सञ्जज्ञे मरीचेः कश्यपः सुतः।
विवस्वान् कश्यपाज्जज्ञे मनुर्वैवस्वतः स्मृतः॥ **1.70.20** ॥

मनुः प्रजापतिः पूर्वमिक्ष्वाकुश्च मनोः सुतः।
तमिक्ष्वाकुमयोध्यायां राजानं विद्धि पूर्वकम्॥ **1.70.21** ॥

इक्ष्वाकोस्तु सुतः श्रीमान् कुक्षिरित्येव विश्रुतः।
कुक्षेरथात्मजः श्रीमान् विकुक्षिरुदपद्यत॥ **1.70.22** ॥

विकुक्षेस्तु महातेजा बाणः पुत्रः प्रतापवान्।
बाणस्य तु महातेजा अनरण्यः प्रतापवान्॥ **1.70.23** ॥

अनरण्यात् पृथुर्जज्ञे त्रिशङ्कुस्तु पृथोरपि।
त्रिशङ्कोरभवत् पुत्रो धुन्धुमारो महायशाः॥ **1.70.24** ॥

धुन्धुमारान्महातेजा युवनाश्वो महारथः।
युवनाश्वसुतश्चासीन्मान्धाता पृथिवीपतिः॥ **1.70.25** ॥

मान्धातुस्तु सुतः श्रीमान् सुसन्धिरुदपद्यत।
सुसन्धेरपि पुत्रौ द्वौ ध्रुवसन्धिः प्रसेनजित्॥ **1.70.26** ॥

यशस्वी ध्रुवसन्धेस्तु भरतो नाम नामतः।
भरतात् तु महातेजा असितो नाम जायत॥ **1.70.27** ॥

यस्यैते प्रतिराजान उदपद्यन्त शत्रवः।
हैहयास्तालजङ्घाश्च शूराश्च शशबिन्दवः॥ **1.70.28** ॥

तांश्च स प्रतियुध्यन् वै युद्धे राजा प्रवासितः।
हिमवन्तमुपागम्य भार्याभ्यां सहितस्तदा॥ **1.70.29** ॥

असितोऽल्पबलो राजा कालधर्ममुपेयिवान्।
द्वे चास्य भार्ये गर्भिण्यौ बभूवतुरिति श्रुतिः॥ **1.70.30** ॥

एका गर्भविनाशार्थं सपत्न्यै सगरं ददौ।
ततः शैलवरे रम्ये बभूवाभिरतो मुनिः॥ **1.70.31** ॥

भार्गवश्च्यवनो नाम हिमवन्तमुपाश्रितः।
तत्र चैका महाभागा भार्गवं देववर्चसम्॥ **1.70.32** ॥

ववन्दे पद्मपत्राक्षी काङ्क्षन्ती सुतमुत्तमम्।
तमृषिं साभ्युपागम्य कालिन्दी चाभ्यवादयत्॥ **1.70.33** ॥

स तामभ्यवदद् विप्रः पुत्रेप्सुं पुत्रजन्मनि।
तव कुक्षौ महाभागे सुपुत्रः सुमहाबलः॥ **1.70.34** ॥

महावीर्यो महातेजा अचिरात् सञ्जनिष्यति।
गरेण सहितः श्रीमान् मा शुचः कमलेक्षणे॥ **1.70.35** ॥

च्यवनं च नमस्कृत्य राजपुत्री पतिव्रता।
पत्या विरहिता तस्मात् पुत्रं देवी व्यजायत॥ **1.70.36** ॥

सपत्न्या तु गरस्तस्यै दत्तो गर्भजिघांसया।
सह तेन गरेणैव सञ्जातः सगरोऽभवत्॥ **1.70.37** ॥

सगरस्यासमञ्जस्तु असमञ्जादथांशुमान्।
दिलीपोंऽशुमतः पुत्रो दिलीपस्य भगीरथः॥ **1.70.38** ॥

भगीरथात् ककुत्स्थश्च ककुत्स्थाच्च रघुस्तथा।
रघोस्तु पुत्रस्तेजस्वी प्रवृद्धः पुरुषादकः॥ **1.70.39** ॥

कल्माषपादोऽप्यभवत् तस्माज्जातस्तु शङ्खणः।
सुदर्शनः शङ्खणस्य अग्निवर्णः सुदर्शनात्॥ **1.70.40** ॥

शीघ्रगस्त्वग्निवर्णस्य शीघ्रगस्य मरुः सुतः।
मरोः प्रशुश्रुकस्त्वासीदम्बरीषः प्रशुश्रुकात्॥ **1.70.41** ॥

अम्बरीषस्य पुत्रोऽभून्नहुषश्च महीपतिः।
नहुषस्य ययातिस्तु नाभागस्तु ययातिजः॥ **1.70.42** ॥

नाभागस्य बभूवाज अजाद् दशरथोऽभवत्।
अस्माद् दशरथाज्जातौ भ्रातरौ रामलक्ष्मणौ॥ **1.70.43** ॥

आदिवंशविशुद्धानां राज्ञां परमधर्मिणाम्।
इक्ष्वाकुकुलजातानां वीराणां सत्यवादिनाम्॥ **1.70.44** ॥

रामलक्ष्मणयोरर्थे त्वत्सुते वरये नृप।
सदृशाभ्यां नरश्रेष्ठ सदृशे दातुमर्हसि॥ **1.70.45** ॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये बालकाण्डे सप्ततितमः सर्गः॥